# १ सहस्त्रं वर्षावधौ जातपरिवर्तनानां निरीक्षणम्





प्रथमे द्वितीये च मानचित्रे च दृष्टिपातं कुर्वन्तु। प्रथमं मानचित्रम् अरबस्य भूगोलवेत्ता अल-इद्रासी ११५४ तमे वर्षे निर्मितवान्। अत्र यत् मानचित्रं दत्तम् अस्ति तत् तेन रचितस्य विश्वस्य बृहत्तमस्य मानचित्रस्य कश्चन एकः भागः अस्ति। एतत् मानचित्रं भारतीयम् उपमहाद्वीपं दर्शयति। द्वितीयं मानचित्रम् मानचित्रं फ्रांसदेशस्य कश्चन **मानचित्रकारः** १७२० तमे वर्षे निर्मितवान् आसीत्। द्वे अपि मानचित्रे एकस्य एव क्षेत्रस्य स्तः परन्तु तयोः मध्ये महत् अन्तरम् अस्ति। अल-इद्रासी-महोदयस्य रचिते मानचित्रे दक्षिणभारतं तस्मिन् स्थाने अस्ति यत्र वयम् अद्य उत्तरभारतम् अन्वेक्ष्यामः अपि च श्री लङ्कायाः द्वीपः उपरिभागे अस्ति। स्थानानां नामानि अरबी-भाषया प्रदत्तानि सन्ति

मानचित्रम् ?

द्वादश-शताब्द्याः भूगोलवेत्रा अल-इद्रासी-महोदयेन निर्मितं विश्वस्य मानचित्रस्य कश्चन भागः, यस्मिन् भूप्रदेशात् भारतीयः उपमहाद्वीपः दर्शितः अस्ति।

**मानचित्रकारः**

यः जनः मानचित्राणि रचयति।




मानचित्रम् - २
अष्टादश-शताब्द्याः आरम्भे ग्विलॉम द लिस्ले-महोदयस्य - नूवो इति मानचित्रावल्याः अनुसारम् उपमहाद्वीपः ।

तेषु च कानिचन परिचितानि नामानि अपि सन्ति, यथा उत्तरप्रदेशस्य कन्नौज । द्वितीयं मानचित्रं प्रथमस्य मानचित्रस्य निर्माणानन्तरं प्रायशः ६०० वर्षाणाम् अनन्तरं रचितम् अस्ति । एतस्मिन् कालावधौ उपमहाद्वीपस्य संज्ञाने महत् परिवर्तनम् अभवत् । इदं मानचित्रम् अस्माकं कृते अधिकं सुपरिचितं भविष्यति । तस्मिन् विशेषरूपेण तट-क्षेत्राणां सूक्ष्मतमाः सूचनाः दृष्ट्वा आश्चर्यं भवति । यूरोपस्य नाविकाः वणिजः च स्वस्याः समुद्रयात्रायाः कृते एतस्य मानचित्रस्य प्रयोगं कुर्वन्ति स्म । (पश्यन्तु षष्ठमे अध्याये )।

?

परन्तु अधुना अन्तःस्थेषु क्षेत्रेषु दृष्टिपातं कुर्वन्तु । किम् एतेषु अपि तावत्यः एव सूचनाः सन्ति यावत्यः समुद्रतटयुक्तस्य भागे सन्ति ? गङ्गायाः मार्गं पश्यन्तु । एषः कथं दर्शितः अस्ति ? एतस्मिन् मानचित्रे तट-क्षेत्राणाम् अन्तःस्थानां क्षेत्राणां च मध्ये सूचनानां सौक्ष्मस्य च यत् अन्तरम् अस्ति, भवतां विचारानुसारं तस्य किं कारणं भवितुं शक्नोति ?

एतावती एव महत्त्वपूर्णा काचित् एका वार्ता इयम् अस्ति यत् द्वितीयं युगं यावत् मानचित्राङ्कनस्य विज्ञानम् अपि बहुपरिवर्तितम् आसीत्। इतिहासकाराः यदा अतीतस्य अभिलेखानां लेखानां च अध्ययनं कुर्वन्ति तदा तेषां सूचनासन्दर्भाणां एवञ्च विभिन्नानाम् ऐतिहासिकीनां पृष्ठभूमीनाम् अवधानम् अपि तेषां कृते आवश्यकम् भवति।

## नूतना पुरातनी च शब्दावली

यदि समयस्य अनुसारं सूचनानां सन्दर्भाः परिवर्तिताः भवन्ति, तर्हि भाषया अर्थैः च साकं किं भवति ? ऐतिहासिकाः अभिलेखाः विविधासु भाषासु उपलभ्यन्ते अपि च एताः भाषाः अपि समयेन साकं बहु-परिवर्तिताः सन्ति । उदाहरणार्थं मध्ययुगस्य फारसी आधुनिकस्य युगस्य फारसीभाषातः भिन्ना अस्ति। एषा भिन्नता केवलं व्याकरणे एवञ्च शब्दभण्डारे एव न आगता अस्ति अपितु समयानुसारं शब्दानाम् अर्थाः अपि परिवर्तिताः भवन्ति।

उदाहरणार्थं हिन्दुस्तान इति शब्दं स्वीकुर्मः । वयम् अद्यत्वे एतम् आधुनिक-राष्ट्र–राज्यं भारतम् इति अस्मिन् अर्थे स्वीकुर्मः। त्रयोदश-शताब्द्यां यदा फारसीदेशस्य इतिहासकारः मिन्हाज-ए-सिराजमहोदयः हिन्दुस्तानशब्दस्य प्रयोगं कृतवान् आसीत् तदा तस्य अभिप्रायः पञ्जाब-हरियाणा-गङ्गा-यमुनाः च अन्तरा स्थितेभ्यः क्षेत्रेभ्यः आसीत्। तेन अस्य शब्दस्य राजनैतिके अर्थे तेषां क्षेत्राणां कृते प्रयोगः कृतः यानि देहल्याः शासकस्य अधिकार-क्षेत्रे आगच्छन्ति स्म । साम्राज्यस्य प्रसारेण सार्धम् एतस्य शब्दस्य अन्तर्गते आगतक्षेत्राणि अपि वर्धितानि, परन्तु हिन्दुस्तानशब्दे दक्षिणभारतस्य समावेशः कदापि न जातः । एतद् अतिरिच्य षोडशशताब्द्याः आरम्भे बाबर-महोदयेन हिन्दुस्तानशब्दस्य प्रयोगः एतस्य उपमहाद्वीपस्य भूगोलस्य पशु-पक्षिणाम् एवञ्च अत्रत्य-निवासिनां संस्कृतेः वर्णनार्थं कृतम् अस्ति । अयं प्रयोगः चतुर्दशशताब्द्याः कविना अमीर-खुसरो-महोदयेन प्रयुक्त-शब्दस्य "हिन्द" इत्यस्य एव किञ्चित् समानः आसीत्। परन्तु यथा 'भारतम्' इति कस्मिँश्चित् भौगोलिके सांस्कृतिक-सत्त्वस्य रूपे परिचीयते स्म तथैव 'हिन्दुस्तान' इति शब्देन ते राजनैतिकाः राष्ट्रियाः अर्थाः च सम्बद्धाः न आसन् यान् वयम् अद्य योजयामः।

कस्यापि शब्दस्य प्रयोगे इतिहासकारैः बहुसावधानैः भाव्यं यतोहि अतीते तेषां शब्दानां केचन भिन्नाः एव अर्थाः आसन् । उदाहरणार्थं "विदेशीसदृशम्" सरलं शब्दम् एव स्वीकुर्मः। अस्माकं कृते अद्य एतस्य अर्थः भवति एतादृशः जनः यः भारतीयः न स्यात्।

मध्ययुगे यथा कश्चित् ग्रामम् आगन्ता कोऽपि अपरिचित-जनः यः तस्य समाजस्य संस्कृतेः च अङ्गभूतः न भवेत् "विदेशी" इति उच्यते स्म। एतादृशं जनं हिन्द्या परदेशी

?

किं भवन्तः एतादृशान् काञ्चन् अन्यान् शब्दान् स्मरन्ति येषाम् अर्थाः विभिन्नेषु

इति फारसीभाषया च ‘अजनबी’ इति उच्यते । अतः कस्यचित् नगरवासिनः कृते वनवासी “विदेशी” भवति स्म किन्तु एकस्मिन् एव ग्रामे निवसन्तौ द्वौ कृषकौ विभिन्नाभिः धार्मिकाभिः जातिपरम्पराभिः सम्बद्धौ अपि अन्योऽन्ययोः कृते विदेशिनौ न भवतः स्म।

### इतिहासकाराः तेषां स्रोतांसि च

इतिहासकाराः कस्य युगस्य अध्ययनं कुर्वन्ति तेषाम् अन्वेषणस्य प्रकृतिः च कीदृशी अस्ति एतत् सर्वं मनसि निधाय विभिन्नानां स्रोतसाम् आश्रयं स्वीकुर्वन्ति। उदाहरणार्थं गतवर्षे भवन्तः गुप्तवंशस्य शासकानां हर्षवर्धनस्य च विषये पठितवन्तः । एतस्मिन् पुस्तके वयं स्थूलरूपेण ७०० तः १७५० ख्रिस्ताब्दं यावत् प्रायः सहस्रं वर्षाणां विषये पठिष्यन्ति । इतिहासकाराः एतस्य कालस्य अध्ययनस्य कृते येषां स्रोतसां प्रयोगं कुर्वन्ति, तेषु भवन्तः बहून् एतादृशान् विषयान् प्राप्स्यन्ति ये विषयाः गतयुगादारभ्य एवमेव प्रचलन्तः सन्ति। इतिहासकाराः एतस्य कालस्य विषये सूचनाः एकत्रीकर्तुम् अधुना अपि नाणकानां शिलालेखानां स्थापत्य-कलानां लिखितसामग्र्याः च उपरि निर्भराः सन्ति। परन्तु केचन विषयाः पूर्वापेक्षया बहुभिन्नाः अपि सन्ति। एतस्मिन् युगे प्रामाणिक्याः लिखितसामग्र्याः सङ्ख्या विविधता च आश्चर्यजनकरूपेण वर्धिता अस्ति। एतस्य अग्रे इतिहासकाराः सूचनानाम् अपरेषां नाणकादीनां स्रोतसां प्रयोगं शनैः शनैः न्यूनातिन्यूनं कर्तुम् आरब्धवन्तः।

## कर्गदस्य मूल्यम्

एतयोः द्वयोः प्रसङ्गयोः तोलनं कुर्वन्तु :

(1) त्रयोदशशताब्द्याः मध्ये कश्चित् एकः विद्वान् कस्यचित् एकस्य पुस्तकस्य प्रतिलिपेः आवश्यकताम् अनुभूतवान्। तस्य पार्श्वे तावत् कर्गदं न आसीत् अतः तेन एका एतादृशी पाण्डुलिपिः प्रक्षालिता यस्याः सः अधुना आवश्यकतां न अनुभवति स्म अपि च तस्याः कर्गदस्य शोषणं कृत्वा पुनः प्रयोगं कृतवान्।

(2) शताब्द्याः अनन्तरं यदि भवन्तः विपणितः किञ्चित् खाद्यपदार्थं क्रीणन्ति तर्हि भवितुं शक्नोति यत् भवतां भाग्यं सम्यक् स्यात् अपि च आपणिकः तत् वस्तु कर्गदे वेष्टयित्वा भवते दद्यात्।

?

तर्हि कर्गदं कदा महार्घम् आसीत् कदा सरलतया उपलब्धं च आसीत् – त्रयोदश्यां शताब्द्याम् अथवा चर्तुदश्यां शताब्द्याम्?

एतस्मिन् समयावधौ कर्गदं क्रमशः अल्पमूल्यवत् जातं बृहन्मात्रायां च उपलब्धं जायमानम् आसीत् । जनाः धर्मग्रन्थान्, शासकानां वृत्तान्तानि, सतां लेखान् एवञ्च उपदेशान्, प्रार्थनापत्राणि, न्यायालयानाम् अभिलेखान्, आयव्ययविवरणाणि कराणां विवरणादीनि च लेखितुम् कर्गदस्य उपयोगम् आरब्धवन्तः । धनाढ्याः शासकाः जनाः मठाः देवालयाः च पाण्डुलिपीः एकत्रीकुर्वन्ति स्म । एताः पाण्डुलिपीः पुस्तकालयेषु तथा च अभिलेखागारेषु स्थाप्यन्ते । पाण्डुलिपिभिः लेखैः च इतिहासकाराः महतीं विस्तृतां सूचनां प्राप्नुवन्ति परन्तु अनेन सार्धम् एव एतादृश्याः सामग्र्याः उपयोगः कठिनः अस्ति ।

तेषु दिनेषु मुद्रणालयाः तु न आसन्, अतः लिपिकाः अथवा अनुकर्तारः हस्ताभ्याम् एव पाण्डुलिपीनां प्रतिकृतिं रचयन्ति स्म । यदि भवन्तः कदाचित् कस्यचित् मित्रस्य गृहकार्यस्य अनुकरणं कृतवन्तः स्युः तदा भवन्तः जानीयुः यत् एतत् कार्यं सरलं न भवति । कदाचित् भवन्तः स्वस्य मित्रस्य अक्षरविन्यासम् अवगन्तुम् असमर्थाः स्युः अतः भवन्तः बाध्याः भूत्वा अनुमानम् एव कुर्वन्ति यत् किं लिखितम् अस्ति । फलस्वरूपं भवतां लेखे मित्रस्य लिखितपत्रात् केचन लघवः स्थूलाः च परन्तु महत्त्वपूर्णाः भेदाः आगताः स्युः ।



**अभिलेखागारः**

*एतादृशं स्थानं यत्र अभिलेखाः पाण्डुलिपयः च सङ्गृह्यन्ते । अद्य सर्वेषां राष्ट्रियानां राज्यसर्वकाराणां च अभिलेखागाराः भवन्ति यत्र ते स्वस्य सर्वेषां पुरातनानां सर्वकरीयाभिलेखानां आयव्ययस्य च विवरणं स्थापयन्ति ।*

चित्रम् – १

इयम् **काचित् एका** लघुचित्रस्य प्रतिकृतिः अस्ति यस्याम् **कश्चित् एकः** लिपिकः कस्याश्चित् पाण्डुलिपेः अनुकरणं कुर्वन् अस्ति । **एतस्य चित्रस्य आकारः केवलम् १०.५ सें.मी. × ७.१ से.मी. अस्ति** । एतस्य लघ्वा-कारस्य कारणेन **एतत्** लघुचित्रम् अथवा मिनियेचर इति **कथ्यते** । **कदाचित् एतेषां लघुचित्राणां प्रयोगः पाण्डुलिपि- लेखानां स्पष्टतार्थं क्रियते स्म** । एते एतावन्ति सुन्दराणि भवन्ति स्म यत् कालक्रमेण सङ्ग्रहकर्तारः प्रायः एतानि चित्राणि पाण्डुलिपिभ्यः पृथक्-कृत्वा विक्रेतुम् **एव** आरब्धवन्तः आसन् ।



चित्रम् – २ लेखनस्य विभिन्न-प्रकाराणां शैलीनां कारणतः फारसी-भाषां अरबी-भाषां च पठितुं काठिन्यं भवितुं शक्नोति । वामतः नस्तलिक-लिपौ वर्णान् योजयित्वा धाराप्रवाहरूपेण लिख्यन्ते । फारसी-भाषायाः अरबी-भाषायः च ज्ञातॄणां कृते एतस्याः लिपेः पठनं सरलं भवति । दक्षिणतः शिक्स्त-लिपिः अधिका सघना सङ्क्षिप्ता कठिना च अस्ति ।

पाण्डुलिपेः प्रतिकृतिनिर्माणे अपि किञ्चित् इत्थम् एव भवति । प्रतिलिपीनां निर्माणकाले लिपिकाः कानिचन परिवर्तनानि कुर्वन्ति स्म, कुत्रचित् कश्चित् शब्दः कुत्रचित् किञ्चित् वाक्यम् । प्रत्येकं शताब्द्यां प्रतिलिपीनाम् अपि प्रतिलिपयः निर्मिताः जाताः अन्ततः एकस्य एव मूलग्रन्थस्य विभिन्नाः प्रतिलिपयः परस्परं बहुधा पृथक् – जाताः । एतस्मात् अतिगभीराः समस्याः उत्पन्नाः जाताः यतोहि अद्य वयं लेखकानां मूलपाण्डुलिपयः प्रायः एव कुत्रचित् लभ्येमहि । वयं पश्चात् जातैः लिपिकारैः निर्मितासु प्रतिलिपिषु एव पूर्णतया निर्भराः भवामः । अतः एतस्य निरधारणार्थं यत् मूलतः लेखकः किं लिखितवान् आसीत्, इतिहासकाराः एकस्य एव ग्रन्थस्य विभिन्नानां प्रतिलिपीनाम् अध्ययनं कर्तुं बाध्याः सन्ति ।

बहुधा लेखकाः स्वयम् अपि समयानुसारं स्वस्य मूलवृत्तान्तेषु संशोधनं कुर्वन्ति स्म । चतुर्दशशताब्द्याः इतिहासकारः जियाउद्दीनबरनी-महोदयः स्वस्य वृन्तान्तं प्रथमतया १३५६ तमे वर्षे अपि च द्वितीयवारम् एतस्य वर्षद्वयानन्तरं लिखितम् आसीत् । द्वयोः मध्ये अन्तरम् अस्ति इतिहासकाराः १९७१ तमं वर्षं यावत् प्रथमवारं यत् वृत्तान्तं रचितम् आसीत् तस्य विषये न जानन्ति स्म । इदं पुस्तकालयानां विशालेषु सङ्ग्रहेषु कुत्रचित् निगूढम् आसीत् ।

### *नूतनाः सामाजिकाः राजनैतिकसमूहाः च*

७०० तमात् ख्रिस्ताब्दात् १७५० ख्रिस्ताब्दं यावत् सहस्रवर्षाणां कालखण्डस्य अध्ययनम् इतिहासकाराणां पुरतः महत् आह्वानं स्थापयति। यतो हि एतस्मिन् काले बाहुल्येन विविधानि परिवर्तनानि जातानि। एतस्मिन् कालखण्डे भिन्ने भिन्ने समये नूतनायाः प्रौद्योगिक्याः दर्शनं भवति, यथा सेचने चक्रं वयने तान्तवचक्रं युद्धे आग्नेयास्त्राणां प्रयोगः च। एतस्मिन् उपमहाद्वीपे नूतनप्रकारकाणां खाद्यवस्तूनाम् अपि आगमनम् अभूत् यथा आलूकं कणीशं मरीचिका चायं कॉफी इति च। इदं ध्यातव्यं यत् एतानि सम्पूर्णानि परिवर्तनानि नूतनाः प्रौद्योगिक्यः सस्यानि च तैः जनैः सह आगतानि ये जनाः नूतनां विचारान् आनीय आगतवन्तः आसन्। परिणामतः अयम् आर्थिक-राजनैतिक-सामाजिक-सांस्कृतिकानां परिवर्तनानां च कालः आसीत्। पञ्चमे षष्ठे सप्तमे अध्याये च भवन्तः एतेषु केषाञ्चित् विषये ज्ञास्यन्ति।

एतस्मिन् युगे जनानां गतिशीलता जनानां स्थानात् स्थानान्तरं प्रति गमनागमनं वर्धितम् आसीत्। अवसरस्य अन्वेषणे जनानां समूहाः सुदूरदेशानां यात्रां प्रारब्धवन्तः आसन्। एतस्मिन् उपमहाद्वीपे बहुलाः सम्पदः अपि च स्वस्य भाग्यस्य निर्माणार्थम् अनन्ताः सम्भावनाः विद्यमानाः आसन्।

*चित्रम् – ३*
*कूपचक्रम्*



एतस्मिन् काले येषां समुदायानां महत्त्वं वर्धितं तेषु कश्चित् समुदायः राजपूतः इति आसीत् यस्य उत्पत्तिः राजपुत्रः अर्थात् राज्ञः पुत्रः इत्यस्मात् मन्यते । अष्टमशताब्द्येः आरभ्य चतुर्दशशताब्द्येः मध्ये इदं नाम सामान्यरूपेण योद्धृणां तस्य समूहस्य कृते प्रयुज्यते स्म यः क्षत्रिय-वर्णः अस्मि इति उद्घोषयति स्म । राजपूत-शब्दस्य अन्तर्गतं केवलं राजानः सामन्तवर्गः एव न आसीत् अपितु ते सेनापतयः सैनिकाः अपि आगच्छन्ति स्म ये सम्पूर्णे उपमहाद्वीपे विभिन्नानां शासकानां सेनासु सेवारताः आसन् । कवयः चारणाः च राजपुत्राणां आचारसंहितायाः प्रबलपराक्रमस्य स्वामिभक्तेः च गुणगानं कुर्वन्ति स्म । एतस्मिन् युगे राजनैतिक-महत्त्व-प्राप्तेः अवसराणां लाभः मराठासमूहैः सिक्खैः जाट-समूहैः अहोम-जनैः कायस्थादिभिः च अर्थात् ये जनाः प्रायः लिपिकानां कार्यं कुर्वन्ति स्वीकृतः ।

एतस्यां कालावधौ क्रमशः वनानां कर्तनं जायमानम् आसीत् तथा च कृषिक्षेत्रं वर्धमानम् आसीत् । केषुचित् क्षेत्रेषु इदं परिवर्तनम् अन्येषां क्षेत्राणाम् अपेक्षया अधिकगत्या सम्पूर्णेन रूपेण च जातम् । पर्यावासे परिवर्तनस्य कारणतः बहवः आदिवासिनः स्वकीयं स्थानं त्यक्तुं बाध्याः जाताः । केचन अन्ये वनवासिनः भूमेः कर्षणम् आरब्धवन्तः कृषकाः च जाताः । कृषकाणाम् एते नूतनाः समूहाः क्षेत्रीयेभ्यः विपणिभ्यः ग्रामप्रमुखेभ्यः अर्चकेभ्यः मठेभ्यः मन्दिरेभ्यः च प्रभाविताः जाताः ते बृहतः एवञ्च गहनसमाजस्य अङ्गभूताः जाताः । तैः स्थानीयाय स्वामिवर्गाय करः वस्तूनि च दातव्यं भवति स्म एवञ्च स्वामीवर्गस्य सेवा करणीया भवति स्म । परिणामतः कृषकाणां मध्ये आर्थिकानि सामाजिकानि च अन्तराणि प्रादुर्भूतानि । केषाञ्चित् पार्श्वे उर्वरा भूमिः आसीत् केचन जनाः पशूनां पालनम् अपि कुर्वन्ति स्म केचन जनाः च कृषिकार्यात् अवशिष्टे काले चित्रकलायाः कार्यं कुर्वन्ति स्म । यथा यथा समाजे अन्तराणि वर्धितानि, जनाः जातिषु उपजातिषु च विभक्ताः जाताः तेषां पृष्ठभूमीनां व्यवसायानां च आधारेण ते समाजे निम्नोच्चवर्गरूपेण चिह्निताः जाताः । एतौ उच्चनीचवर्गौ स्थायिरूपौ न आस्ताम् । कस्याश्चित् जातिविशिष्टायाः सदस्याः कियन्तः शक्तिमन्तः प्रभावशालिनः संसाधननियन्तारः च सन्ति, एतदाधारेण तेषां वर्गेषु परिवर्तनं भवति स्म । एकस्याः एव जातेः कस्मिंश्चित् क्षेत्रविशेषे भिन्नं स्थानम् अन्यस्मिन् कस्मिंश्चित् क्षेत्रविशेषे च किमपि अन्यत् स्थानं भवितुं शक्नोति स्म ।

स्वस्य सदस्यानां व्यवहारस्य नियन्त्रणं कर्तुं जातयः स्वयं स्वस्य नियमान् कल्पयन्ति स्म । एतेषां नियमानां पालनं जातेः वरिष्ठानां वृद्धानां च एका सभा कारयति स्म या केषुचित् क्षेत्रेषु जातिपञ्चायतम् इति उच्यते स्म । परन्तु

**पर्यावासः**
कस्यचिदपि क्षेत्रस्य पर्यावरणम् एवञ्च तत्रत्यानां वासिनां सामाजिकम् एवञ्च आर्थिकं जीवनं र्यावासः इति भवति ।

?

अस्मिन् अनुभागे यानि प्रौद्योगिकीयकानि आर्थिकानि सामाजिकानि सांस्कृतिकानि च परिवर्तनानि वर्णितानि सन्ति, तेषु कानि कानि परिवर्तनानि भवतां दृष्टौ भवतां नगरे ग्रामे वा सर्वाधिकानि महत्त्वपूर्णानि सन्ति ?

जातिभिः स्वस्य निवासस्य ग्रामाणां संस्कृतीनां पालनम् अपि करणीयं भवति स्म । एतत् अतिरिक्तं केषुचित् ग्रामेषु प्रमुखाणां शासनं भवति स्म एते मिलित्वा कस्यचित् राज्यस्य किमपि लघु घटकं रचयन्ति स्म ।

## क्षेत्राणि साम्राज्यानि च

चोलराज्यम् (द्वितीयः अध्यायः) तुगलकराज्यम् (तृतीयः अध्यायः) मुगलराज्यम् (चतुर्थः अध्यायः) इत्येतादृशानां महतां राज्याणाम् अन्तर्गतानि बहूनि क्षेत्राणि आगच्छन्ति स्म । देहल्याः शासकः गयासुद्दीन-बलबनः (१२६६ - १२८७) कस्याञ्चित् संस्कृतप्रशस्त्यां (प्रशस्तेः उदाहरणार्थं द्वितीयम् अध्यायं पश्यन्तु) कस्यचित् एकस्य विशाल-साम्राज्यस्य शासकः उक्तः आसीत् यत् पूर्वस्यां दिशि बङ्गप्रान्तात् आरभ्य पश्चिमदिशि अफगानिस्तानस्य गजनीं यावत् प्रथितम् आसीत् । यस्मिन् च सम्पूर्णं दक्षिणभारतम् अपि सम्मिलितम् आसीत् । गौडक्षेत्रस्य आन्ध्रस्य केरलस्य कर्नाटकस्य महाराष्ट्रस्य गुर्जरादीनां विभिन्नानां प्रान्तानां जनाः तस्य सेनायाः पुरतः पलायनं कुर्वन्ति स्म ।

**माचित्रम् – ३**

मिश्रस्य शिहाबुद्दीन-उमरीद्वारा रचितं मसालिक-अल-अबसर-फि-ममालिक-अल-अमसरस्य अनुसारं मुहम्मद-तुगलकस्य राज्यकाले देहली-शासनस्य अन्तर्गत-परिगणिताः प्रान्ताः ।




| | | | |
|---|---|---|---|
| *१. सिविस्तानः* | *२. उच्छः* | *३ . मुल्तानः* | *४. कलानौरः* |
| *५. लाहौरः* | *६. समाना* | *७. सरसुती* | *८. कुहरामः* |
| *९. हाँसी* | *१०. दिल्ली* | *११. बदायू* | *१२. कन्नौजः* |
| *१३. कडा* | *१४. अवधः* | *१५. बिहारः* | *१६. लखनौती* |
| *१७. जाजनगरः* | *१८. मालवा* | *१९. गुर्जर-प्रान्तः* | *२०. देवगिरी* |
| *२१. तेलङ्गाना* | *२२. तैलंगः* | *२३. द्वारसमुद्रः* | *२४. मालाबारः* |

?

एतेषु केषाञ्चित् लघूनां बृहतां च राज्यानां शासनम् आसीत् अथ च एतेषां राज्यानाम् अधिकतराः विषयाः एतस्य उपमहाद्वीपस्य बहुषु भागेषु प्रथितानाम् एतेषां क्षेत्राणां कृते न्यासरूपेण प्राप्ताः आसन् ।

इतिहासकाराः विजयाभियानस्य एतादृशीः घोषणाः अतिशयोक्तिपूर्णाः मन्यन्ते । एतेन सार्धम् एव ते इदं ज्ञातुं प्रयत्नं कुर्वन्ति यत् शासकाः एतस्य उपमहाद्वीपस्य विभिन्नेषु भागेषु स्वस्य अधिकारस्य उल्लेखं किमर्थं नैरन्तर्येण कुर्वन्ति ।

**भाषा क्षेत्रं च**

कविः अमीरखुसरो-महोदयः १३१८ तमे वर्षे एतस्मिन् विषये अवधानं कृतवान् आसीत् यत् अस्य देशस्य प्रत्येकं क्षेत्रस्य एका पृथक् भाषा अस्ति । सिन्धी, लाहौरी, काश्मीरी, द्वारसमुद्री (दक्षिणकर्णाटके), तेलङ्गानी (आन्ध्र–प्रदेशे) गुर्जरी (गुर्जरे) म-अबारी (तमिलनाडौ) गौडी (बङ्गप्रान्ते) अवधी (उत्तर-प्रदेशस्य पूर्वभागे) हिन्दवी (देहल्याम् अथ च देहल्याः पार्श्वस्थक्षेत्रेषु) इत्येताः भाषाः भाषन्ते स्म ।

अमीर खुसरो-महोदयः अग्रे वर्णयति यत् एताः भाषाः अतिरिच्य काचित् एका भाषा संस्कृतम् अपि अस्ति या कस्यचित् विशेषक्षेत्रस्य भाषा नास्ति । इयम् एका प्राचीना भाषा अस्ति "यां केवलं ब्राह्मणाः जानन्ति सामान्या जनता न जानाति" । एवञ्च एका अपरा सूची तासां भाषाणाम् अपि कुर्वन्तु याः तद्द्वारा उल्लिखितेषु क्षेत्रेषु अद्य अपि उच्यन्ते । यानि नामानि सदृशानि सन्ति तानि रेखाङ्कितानि कुर्वन्तु अथ च यानि नामानि भिन्नानि सन्ति तानि वृत्तेन चिह्नीकुर्वन्तु ।

७०० ख्रिस्ताब्दं यावत् केषाञ्चित् क्षेत्राणां स्वस्य भौगोलिकाः सीमाः निश्चिताः आसन् तेषां स्वस्य भाषाः सांस्कृतिकविशेषताः अधिकस्पष्टाः जाताः आसन् । नवमे अध्याये भवन्तः एतस्मिन् विषये इतोऽपि आधिक्येन सूचनाः प्राप्स्यन्ति । एतानि क्षेत्राणि विशिष्टैः शासक-राजवंशैः सम्बद्धाः आसन् । एतेषां राज्यानां मध्ये महान् द्वन्द्वः अपि चलति स्म । कदाचित् कदाचित् चोल-खलजी-तुगलक-मुगल-सदृशाः राजवंशाः अनेकेषु क्षेत्रेषु प्रथितं किमपि विशालं साम्राज्यम् अपि स्थापयन्ति स्म । एतानि सर्वाणि साम्राज्यानि समानरूपेण स्थैर्यं तथा च साफल्यं न प्राप्नुवन्ति स्म । उदाहरणार्थं तृतीयस्य अध्यायस्य चतुर्थस्य अध्यायस्य च प्रथमायाः तालिकायाः तोलनं कुर्वन्तु । खलजी-वंशस्य मुगलवंशस्य शासनं कियतीम् अवधिं यावत् अचलत् ?

अष्टादश्यां शताब्द्यां मुगलवंशः पतनस्य पथि अग्रेसरः आसीत् । परिणामतः क्षेत्रीयाणि राज्यानि उदयपथम् आरूढानि जातानि । (अध्यायः -१०) | परन्तु बहुभ्यः वर्षेभ्यः यत् सर्वक्षेत्रीय-साम्राज्याणां शासनं चलति स्म तेन क्षेत्राणां प्रकृतिः परिवर्तिता आसीत् । तेषु

एतेषु केषाञ्चित् लघूनां बृहतां च राज्यानां शासनम् आसीत् अथ च एतेषां राज्यानाम् अधिकतराः विषयाः एतस्य उपमहाद्वीपस्य बहुषु भागेषु प्रथितानाम् एतेषां क्षेत्राणां कृते न्यासरूपेण प्राप्ताः आसन् । एतस्य तथ्यस्य ज्ञानं वयं ताभिः परम्पराभिः प्राप्तवन्तः याः एतेभ्यः क्षेत्रेभ्यः उदिताः आसन् । एतासु परामपरासु परस्परं किञ्चित् वैभिन्न्यं किञ्चित् च सामान्यं वर्तते । अस्माभिः एतादृश्यः परम्पराः प्रशासनस्य, अर्थव्यवस्थायाः प्रबन्धने, उच्चसंस्कृतेः, भाषायाः च सन्दर्भे लभ्यन्ते । ७०० ख्रिस्ताब्दाद् आरभ्य १७५० ख्रिस्ताब्दं यावत् इति सहस्रं वर्षेषु एतेषां विभिन्नक्षेत्राणां प्रकृतिः पृथग्रूपेण न विकसिता । यद्यपि तेषां चरित्रस्य स्वस्य विशिष्टताः यथावत् आसन् परन्तु सर्वक्षेत्रीयानां शक्तीनां समन्वयस्यप्रभावः अपि तेषु जातः आसीत् ।

?

जानन्तु यत् किं भवतां राज्यं कदाचित् एतेषां सर्वक्षेत्रीयाणां साम्राज्यानां भागः आसीत् ? यदि आसीत्, तर्हि कियन्तं कालं यावत् इति ?

### *पुरातनाः नूतनाः धर्माः च*

वयम् इतिहासस्य इतिहासस्य येषां सहस्रस्य वर्षाणां निरीक्षणं कुर्वन्तः स्मः एतस्मिन् कालावधौ धार्मिकीषु परम्परासु बहूनि महान्ति परिवर्तनानि आगतानि । दैविकेषु तत्त्वेषु जनानाम् आस्था कदाचित् समूलरूपेण वैयक्तिकस्तरे भवति स्म परन्तु सामान्यरूपेण अस्याः आस्थायाः स्वरूपं सामूहिकं भवति स्म । कस्मिंश्चित् दैविके तत्त्वे सामूहिकी आस्था अर्थात् धर्मः प्रायः स्थानीयानां समुदायानां सामाजिकेन आर्थिकेन च सङ्घटनेन सम्बद्धा भवति स्म । यथा यथा एतेषां समुदायानां सामाजिकः संसारः परिवर्तितः जातः तथैव एतेषाम् आस्थासु अपि परिवर्तनं नैरन्तर्येण आगतम् ।

?

किं भवन्तः संस्कृतज्ञानं एवञ्च ब्राह्मणानां विषये अमीर-खुसरो-महोदयस्य टिप्पणीः स्मरन्ति ?

अद्य वयं यं हिन्दूधर्मं कथयामः तस्मिन् अपि एतस्मिन् एव युगे महत्त्वपूर्णानि परिवर्तनानि आगतानि । एतेषु परिवर्तनेषु कानिचन परिवर्तनानि आसन् नूतनानां देवीनां देवानां च पूजनम् राजभिः मन्दिराणां निर्माणं समाजे च पुरोहितानां रूपे ब्राह्मणानां वर्धितवर्चस्वं अथ च तेषां वर्धन्ती सत्तायाः अवलोकनं भवति ।

*संरक्षकः*

*कश्चित् प्रभावशाली धनी जनः यः कस्यचित् कलाकारस्य शिल्पकारस्य विदुषः अभिजातस्य इव कस्यचित् अन्यस्य जनस्य वा साहाय्यं करोति अथवा तस्य कृते आश्रयं ददाति सः संरक्षकः इति उच्यते ।*

संस्कृतग्रन्थानां ज्ञानस्य कारणतः समाजे ब्राह्मणानां महान् आदरः भवति स्म । नूतनाः शासकाः एतेषां संरक्षकाः आसन् ये स्वयं स्वस्य प्रतिष्ठां वाञ्छन्ति स्म । एतेषां संरक्षकाणां समर्थनस्य कारणतः समाजे एतेषां प्रभावः इतोऽपि वर्धितम् आसीत् ।

अस्मिन् युगे एकं महत्वपूर्णं परिवर्तनं भक्तेः अवधारणायाः रूपे आगतम् । एतस्मिन् ईश्वरस्य कल्पना केनचित् एतादृशेन प्रेमलस्य ईष्टस्य देवीदेवतायाः रूपेण कृता आसीत् यत्र अर्चकानां विशदं कर्मकाण्डं विना एव भक्तः स्वयं प्राप्तुं शक्नुयात् । एतस्मिन् विषये सार्धम् एव च अन्यासां परम्पराणां विषये भवन्तः अष्टमे अध्याये ज्ञास्यन्ति ।

एतत् एव एतादृशं युगम् आसीत् यदा अस्मिन् उपमहाद्वीपे नूतनानां धर्माणाम् अपि आगमनम् अभवत् । भारते सर्वप्रथमं सप्तम्यां शताब्द्यां कुरान-शरीफस्य सन्देशः वणिजाम् आप्रवासिनां च माध्यमेन प्रसरितः । मुस्लिमजनाः कुरानशरीफं स्वकीयं धर्मग्रन्थं मन्यन्ते, केवलम् एकस्य ईश्वर-अल्लाहः इत्यस्य सत्तां स्वीकुर्वन्ति यस्य प्रेम करुणा उदारता च स्वस्मिन् आस्थाधारकं प्रत्येकं जनम् आश्लिष्यति, भवतु नाम तस्य जनस्य सामाजिकी पृष्ठभूमिः कीदृशी अपि ।

केचन शासकाः इस्लाम-धर्मस्य, एतस्य विदुषाम्, धर्मशास्त्रिणाम्, न्यायशास्त्रिणां (उलेमा) च कृते संरक्षणं यच्छन्ति । हिन्दुधर्मस्य इव मुस्लिमधर्मस्य अनुयायिनः अपि स्वस्य धर्मस्य भिन्नेन भिन्नेन प्रकारेण व्याख्यां कुर्वन्ति स्म । मुस्लिमेषु केचन शियाः इति आसन् ये पैगम्बरमहाभागस्य जामातारम् अली-महोदयं मुस्लिमजनानां विधिसम्मतं नेतारं मन्यन्ते स्म । अथ च ये सुन्नी इति आसन् ये खलीफा-जनानां प्रभुत्वं स्वीकुर्वन्ति स्म । इस्लामस्य प्रारम्भिके काले एतस्य धर्मस्य नेतृत्वस्य कर्तारः खलीफा इति उच्यन्ते स्म अथ च अग्रे अपि एषा परम्परा अनुसरणे आसीत् । इस्लामीन्यायसिद्धान्तस्य (विशेषतया भारते एव हनफी शफी च एतादृशाः सिद्धान्ताः सन्ति) एतासु विभिन्नासु परम्परासु अपि केचन महत्त्वपूर्णाः भेदाः आसन् । एतादृशान् एव धर्मसिद्धन्तान् तथा च रहस्यवादिविचारान् स्वीकृत्य विभिन्नताः दृष्टिपथम् आयान्ति ।

## समये एवञ्च इतिहासस्य कालखण्डेषु विचारः

इतिहासकाराः समयं केवलं घट्याः अथवा कालदिग्दिर्शिकायाः इव न पश्यन्ति अर्थात् इतिहासकाराः समयं केवलं घट्याः अथवा कालदिग्दिर्शिकायाः इव न पश्यन्ति अर्थात् समयस्य यापनं केवलं होरारूपेण एषा होरा यापिता अथवा दिनानि वर्षाणि वा व्यतीतानि इति रूपेण न पश्यन्ति । तेषां दृष्टिः इयम् अस्ति यत् समयः सामाजिकसङ्घटने आर्थिकसङ्घटने च जायमानानि परिवर्तनानि दर्शयति । अयं दर्शयति यत् विचारेषु विश्वासेसु च कियत् स्थायित्वम् अपि च कियत् परिवर्तनं आगतम् आसीत् । अपि च कियत् परिवर्तनं आगतम् आसीत् । यदि अतीतं समानविशेषतायाः स्थापकेषु महत्सु भागेषु युगेषु अथवा कालेषु विभक्तं कुर्मः तदा समयस्य अध्ययनं किञ्चित् सरलं भवति ।

आङ्गलैः इतिहासकारैः एकोनविंशत्याः शताब्द्याः मध्ये भारतस्य इतिहासः हिन्दु-मुस्लिम- ब्रिटिशरूपेण त्रिषु भागेषु विभक्तः आसीत् । इदं विभजनं एतत् विचाराधारितम् आसीत् यत् शासकानां धर्मः एव एकमात्रं महत्त्वपूर्णम् ऐतिहासिकं परिवर्तनं भवति एवञ्च अर्थव्यवस्थायां समाजे संस्कृतौ च अन्यत् किञ्चित् अपि महत्त्वपूर्णं परिवर्तनं न

भवति । एतस्मिन् मते एतस्य उपमहाद्वीपस्य अपारायाः विविधतायाः अपि उपेक्षा भवति स्म ।

अद्य एतादृशं कालविभजनम् अल्पतराः इतिहासकाराः एव स्वीकुर्वन्ति । अधिकतराः इतिहासकाराः आर्थिकानां सामाजिकानां च कारकाणाम् आधारेण एव अतीतस्य विभिन्नानां कालखण्डानां विशेषताः निश्चयीकुर्वन्ति । गतवर्षे भवद्भिः ये इतिहासाः पठिताः आसन् तेषु प्राचीन-समाजानां बहुप्रकारकाणां समावेशः आसीत् यथा – आखेटकसङ्ग्राहकाणाम्, आरम्भिककृषिकर्मिणाम्, नगराणां तथा च ग्रामाणां निवासिनां आरम्भिककालस्य राज्यस्य साम्राज्यस्य च इति । अस्मिन् वर्षे भवन्तः यं इतिहासं पठिष्यन्ति सः प्रायः मध्यकालिकः इतिहासः उच्यते । एतस्मिन् भवन्तः कृषकसमाजानां विस्तारस्य, क्षेत्रीयाणां साम्राज्यिकानां राज्यानाम् उदयस्य, कदाचित् ग्रामवासिनां वनवासिनां च महत्वस्य, प्रधानधर्माणां रूपेण हिन्दुधर्मस्य, इस्लामधर्मस्य विकासस्य, यूरोपतः वणिक्समूहानाम् आगमनस्य च विषये इतोऽपि विस्तरेण ज्ञास्यन्ति ।

एतानि सहस्रं वर्षाणि भारतीयेतिहासस्य अनेकेषां परिवर्तनानां साक्षीणि सन्ति । अन्ततः षोडशशताब्दी अष्टादशशताब्दी च अष्टमशताब्द्याः एकादशशताब्द्याः च बहुभिन्ने आस्ताम् । अतः एतस्य सम्पूर्णकालस्य कस्यचित् एकस्य ऐतिहासिक-घटकरूपेण दर्शनं सरलं नास्ति । पुनः मध्यकालस्य तोलनं प्रायः आधुनिकेन कालेन क्रियते । मध्यमकाले आधुनिकतया सार्धं भौतिक्याः उन्नतेः बौद्धिकप्रगतेः च भावः युक्तः अस्ति । एतस्मात् अयम् आशयः निर्गच्छति यत् मध्यकालः रूढिवादी आसीत् तस्मिन् अवधौ किञ्चित् परिवर्तनम् एव न जातम् । परन्तु वयं जानीमः यत् इत्थं न आसीत् ।

एतेषां सहस्रस्य वर्षाणाम् अवधौ एतस्य उपमहाद्वीपस्य समाजेषु प्रायः परिवर्तनानि आगच्छन्ति आसन् अपि च केषाञ्चित् क्षेत्राणाम् अर्थव्यवस्था एतावती समृद्धा जाता आसीत् यत् सा यूरोपस्य वणिक्समूहान् अपि आकर्षितं कर्तुम् आरब्धवती । एतस्य पुस्तकस्य अध्ययनकाले भवन्तः परिवर्तनस्य चिह्नेषु अत्र सक्रियासु ऐतिहासिकीसु प्रक्रियासु अवधानं नैरन्तर्येण कुर्वन्तु । यत्र अपि सम्भवं स्यात् एतस्मिन् पुस्तके भवन्तः यत् पठन्तः सन्ति तस्य तुलनां भवन्तः गतवर्षे पठितैः विषयैः सह कर्तुं प्रयासं कुर्वन्तु । यत्र सम्भवं स्यात् इदं पश्यन्तु यत् कुत्र परिवर्तनानि जातानि सन्ति अपि च कुत्र न जातानि सन्ति अद्य च स्वस्य परिवेशे स्थितस्य संसारस्य उपरि दृष्टिपातं कृत्वा इदम् अपि पश्यन्तु यत् इतोऽपि किञ्चित् परिवर्तितम् अस्ति अथवा पूर्ववत् एव सर्वं विद्यते ।

## कल्पनां कुर्वन्तु



भवान् कश्चन इतिहासकारः अस्ति । अस्मिन् अध्याये उल्लिखित किमपि एकम् आर्थिकं सामाजिकं राजनीतिसम्बद्धितेतिहासविषयं वा चिनोतु बोधयतु च यत् भवतः विचारे तस्य विषयस्य ज्ञानकरणं किमर्थं रुचिकरं भविष्यति ।

## पुनः स्मरन्तु

1 *अतीतकाले वैदेशिकः कः मन्यते स्म ?*

2 *अधोलिखितानि तथ्यानि उचितानि सन्ति अथवा अनुचितानि ?*

क. ७०० शताब्द्याः अनन्तरं यः कालः आसीत् तत्कालेन सम्बद्धाः अभिलेखाः न उपलभ्यन्ते ।

ख. अस्य कालस्य अवधौ मराठाजनैः स्वस्य राजनीतिसम्बद्धस्य महत्त्वस्य स्थापना कृता ।

ग. कृषि-केन्द्रितानां कुटीराणां विस्तारेण सार्धं कदाचित् कदाचित् वनवासिनः स्वस्य भूमितः निष्कास्य बहिः क्रियन्ते स्म ।

घ. शासकः गयासुद्दीनबलबनः असमस्य मणिपुरस्य तथा च काश्मीरस्य शासकः आसीत् ।

3. *रिक्तस्थानानि पूरयन्तु -*

क. *अभिलेखागारेषु ............ स्थाप्यन्ते ।*

ख. *........... चतुर्दश्याः शताब्द्याः कश्चन इतिहासकारः आसीत् ।*

ग. *..... ...... ..... ........ च ...... एतस्मिन् उपमहाद्वीपे अस्मिन् कालावधौ आनीतानि कानिचन सस्यानि सन्ति ।*

4. *अस्मिन् काले जातानां केषाञ्चित् प्रौद्यौगिकीयानां परिवर्तनानां तालिकां यच्छन्तु ।*

5. *एतस्मिन् कालावधौ जातानां केषाञ्चित् धार्मिकानां परिवर्तनानां सूचनां यच्छन्तु ।*

### बीज-शब्दः

पाण्डुलिपिः, जातिः,

क्षेत्रम्,

कालविभाजनम्

## आगच्छन्तु जानीमः

*6. गतासु बह्वीषु शताब्दीषु "हिन्दुस्तान" शब्दस्य अर्थः कथं परिवर्तितः अस्ति ?*

*7. जातीनां विषयाः कथं नियन्त्र्यन्ते स्म ?*

*8. सर्वक्षेत्रीयात्साम्राज्यात् भवन्तः किम् अवगच्छन्ति ?*

## आगच्छन्तु विचारं कुर्वन्तु

*9. पाण्डुलिपीनाम् उपयोगे इतिहासकाराणां पुरतः काः काः समस्याः आयान्ति ?*

*10. इतिहासकाराः अतीतं कालेषु युगेषु च कथं विभागं कुर्वन्ति ? किम् एतस्मिन् कार्ये तेषां पुरतः किमपि काठिन्यम् आगच्छति ?*

## आगच्छन्तु कृत्वा पश्यामः

*11. अध्याये प्रदत्तस्य प्रथमस्य मानचित्रस्य अथवा द्वितीयस्य मानचित्रस्य तुलनाम् उपमहाद्वीपस्य अद्यतनस्य मानचित्रेण सह कुर्वन्तु । तुलनां कुर्वन्तः उभयोः मध्ये यावत्यः समानताः अपि च असमानताः लभ्यन्ते तासां सूचीं कुर्वन्तु ।*

*12. जानन्तु यत् भवतां ग्रामे नगरे वा अभिलेखाः (रिकार्ड) कुत्र स्थाप्यन्ते । एतान् अभिलेखान् कः सज्जीकरोति ? किं भवतां परिवेशे कश्चित् अभिलेखागारः अस्ति ? तस्य संरक्षणं कः करोति ? तत्र कीदृशाः अभिलेखाः सङ्गृहीताः सन्ति ? तेषाम् उपयोगं के जनाः कुर्वन्ति ?*